श्रीवैष्णवसौभाग्ये

# ॥ श्रीवरवरमुनितिथिमाला ॥

(अक्षरान्तादिः)

---

श्रीमति वरवरयोगिन्यद्भुतवैदुष्यशेवधौ भक्ताः ।
ये ते सात्त्विकगोष्ठ्यां प्रथमां गणनां भजन्ति नियमेन ॥१॥

नश्वरपुमर्थवांछां विसृज्य वरयोगिदिव्यसूक्तिषु ये ।
प्रेमप्रकर्षभरितास्तेषां शुभकीर्तिरद्वितीया स्यात् ॥ २ ॥

स्यादिह वरवरयोगी सततं मय्येव करुणया भरितः ।
यस्याः प्रभावभूम्ना सपदि ¶ तृतीया दृगन्तरुन्मिषति ॥ ३

तिमिरं निरसितुमवनौ तदातदा जन्म कुर्वतः फणिनः ।
यन्मूर्तिरिह $ चतुर्थी तं वरयोगीन्द्रमविरतं स्तुमहे ॥ ४ ॥

एतत्प्रपञ्चमीशो विष्णुः कृपयाऽभिरक्षतीति मृषा ।
सत्यं वरवरयोगी स्वकीयदिव्योक्तिततिभिरभिरक्षी ॥५॥

क्षित्यां वदन्ति भोग्यं पञ्चामृतनाम वस्तु तच्चास्तु ।
वरवरमुनीन्द्रसूक्तिष्षष्ठी धाराऽमृतस्य सत्यमिदम् ॥ ६ ॥

दमितेन्द्रियाः प्रसिद्धाः ऋषयोऽपि च सप्त मीनकेतुशरैः ।
बाध्यन्त एव नियतं वरवरयोगी परं विरक्ताग्र्यः ॥ ७ ॥

यस्याष्टमीन्दुसन्निभललाटलसदूर्ध्वपुण्ड्ररेखैव ।
सर्वेषु दिव्यदेशेषूल्लसति चिरात् स पातु वरयोगी ॥ ८ ॥

---

¶ तृतीया दृक् = ज्ञानचक्षुः ।

$ नक्षत्रमालाया अन्तिमश्लोकेन व्याख्येयमेतत् ॥

गीर्वाणवाचि सततं नवनवमीदृक् स्तुतीरहं रचयन् ।
रुचिरोपपन्नमुनिवरसेवाहेवाकमस्ति एव स्याम् ॥ ९ ॥
स्यामपि चेदिह दशमीं दशामनुप्राप्त ईषदपि चित्तम् ।
श्रीमद्वरवरयोगिध्यानदरिद्रं न जातु मम भवतु ॥ १० ॥
तुष्यन्विवेकरेकादशीतिपाठीति $ केवलं विप्रः ।
यदि वरमुनीन्द्रफणितिषु वैदुष्यमियात्तदा स सर्वज्ञः ॥११॥
ज्ञानाधिकैकभोग्यास्सूक्तीर्वरयोगिविरचिताः पठताम् ।
परिपूर्णपारणा स्यात् तेषां द्वादश्यहो तिथिस्सकला ॥१२॥
लक्ष्मीपतेर्नियोगात् द्वादश जाता हि दिव्यसूरिवराः ।
अथ च त्रयोदशीयं मूर्तिर्वरयोगिरूपिणी रेजे ॥ १३ ॥
जेजेतु नाथमुनितश्चतुर्दशीमत्र जगति गुरुपीठीम् ।
योऽलंकृत्य विलक्षणकीर्तिर्विरराज स वरवरयोगी ॥१४॥
गीर्भिरमृतोपमाभिः कलानिधेरस्य वरवरस्य मुनेः ।
ध्वस्ततिमिरा धरित्री सततश्च विभाति पौर्णमासीव ॥१५॥
वर्धयितुमिह यतीश्वर§दर्शनमतिमात्रमुत्सुकास्सुधियः ।
श्रीमद्वरवरयोगिव्याख्यास्वेव क्षिपन्तु निजमायुः ॥ १६ ॥
श्रीमद्वरवरमुनिवरगुणगणविख्यापनार्थतिथिमालाम् ।
अनिशं पठतामतिर्थान् सत्कर्तुमपारमुद्रवेद्द्रविणम् ॥

---

$ अशीतिपाठीति प्रसिद्धिः कृष्णपाद्वेदपूर्णाध्यायिनाम् । विवेकरेकात्
तुष्यन् = विवेकविरहेण वेदाध्ययनमात्रतत्तुष्ट इति यावत् ।

§ दर्श इति अमावास्यासूचनम् ।